# हायर सेकेण्डरी परीक्षा वर्ष 2013–2014
## आदर्श प्रश्न पत्र
## संस्कृत सामान्यम्

**Time : 3 Hours** **Maximum Marks : 100**

निर्देश :– (1) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(2) प्रश्नानां सम्मुखे अंका प्रदत्ताः।

1. उचितविकल्पं चित्वा लिखत–

(अ) 'असत्यम्' इत्यस्मिन् पदे समासः अस्ति–

(i) द्विगुः (ब) द्वन्द्वः समासः

(स) नञ् तत्पुरूष समासः (द) कर्मधारणः समासः।

(ब) ''सौन्दर्यबोधः'' पदे समासः अस्ति–

(i) कर्मधारयः (ब) बहुब्रीहिः

(स) तत्पुरूषः (द) द्वन्द्वः

(स) ''जलमग्न'' पदस्य समासविग्रहः अस्ति–

(i) जले मग्नः (ब) जलं मग्नः

(स) जले मग्ने (द) जलाय मग्नः

(द) ''अष्टाध्यायी' इत्यस्मिन् पदे समास अस्ति–

(i) द्वन्द्व समासः (ब) द्विगु समासः

(स) तत्पुरूषः समासः (द) कर्मधारय समासः

(इ) ''नायकः' इत्यस्मिन् पदे सन्धिः अस्ति–

(i) वृद्धि सन्धिः (ii) गुण सन्धिः

(iii) अयादि सन्धिः (iv) दीर्घ सन्धिः

2. उचितविकल्पं चित्वा लिखत–

(अ) अधोलिखितेषु अव्ययम् अस्ति–

(i) अहं (ii) प्रातः

(iii) विद्यालयं (iv) गच्छति

(ब) अधोलिखितेषु अव्ययम् नास्ति –

(i) उच्चैः (ii) खलु

(iii) अस् (iv) सर्वत्र।

(स) ''उपवासः' इत्यस्मिन् पदे उपसर्ग अस्ति।

(i) उ (ii) वासः

(iii) उप (iv) उसः

(द) ''अधोलिखितेषु'' अव्ययं नास्ति–

(i) यत्र (ii) तत्र

(iii) पत्रम् (iv) अत्र

(इ) ''महोत्सवः'' अस्य पदे संधि विच्छेदः अस्ति–

(i) महत्+उत्सवः (ii) महा+उत्सवः

(iii) महान्+उत्सवः (iv) महस्+उत्सवः

**3. उचित विकल्पं चित्वालिखत–**

(अ) 'ल्यप्' प्रत्ययस्य उदाहरणम् अस्ति–

(i) आदाय (ii) महेशाय

(iii) रामाय (iv) गमनाय

(ब) ''पठसि'' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(i) सुप् (ii) तिङ्

(iii) स्त्री (iv) कृत्

(स) ''सामाजिकः' पदे प्रत्ययः अस्ति–

(अ) मतुप् (ब) अण्

(स) ठक् (द) सुप्

(द) ''रामः'' इत्यस्मिन पदे प्रत्ययः अस्ति–

(अ) तिङ् (ब) सुप्

(स) कृत् (द) स्त्री

(इ) ''नमस्ते'' इत्यस्य सन्धिविच्छेदः अस्ति–

(अ) नः+ते (ब) नम्+ते

(स) नस्+ते (द) नमः+ते

4. उचितविकल्पं चित्वा लिखत–

(अ) 'अकरोत्' इत्यत्र लकारः अस्ति–

(i) लट्लकारः

(ii) लृटलकारः

(iii) लङलकारः

(iv) लोटलकारः

(ब) 'गच्छामः' इत्यत्र वचनम् अस्ति

(i) एकवचनम्

(ii) द्विवचनम्

(iii) बहुवचनम्

(स) 'द्रक्ष्यति' इत्यत्र लकारः अस्ति–

(i) लट्लकारः

(ii) लृट्लकारः

(iii) लोट्लकारः

(iv) लङलकारः

(द) .......................... चक्षुर्मनुष्याणम्।

(i) मानं

(ii) ज्ञानं

(iii) अज्ञानं

(iv) दानं

(इ) .................. केवलमीश्वरेच्छा।

(i) लघीयसी

(ii) बलीयसी

(iii) मनस्वी

(iv) यथारूपं

प्रश्न–5

(अ) वपुः इत्यस्य पर्यायशब्दः अस्ति।

(i) हस्तः

(ii) पादः

(iii) शरीरम्

(iv) शिरः

(ब) 'सलिलम्' इत्यस्य पर्यायशब्दः नास्ति–

(i) जलम्

(ii) वारि

(iii) अनिलम्

(iv) तोयम्

(स) ''कुपितः इत्यस्य विलोम शब्दः अस्ति–

(i) दुःखितः

(ii) शान्तः

(iii) मूर्खः

(iv) अपण्डितः

(द) 'विदुषि' इत्यत्र विभक्तिः अस्ति–

(i) प्रथमा

(ii) तृतीया

(iii) पंचमी

(iv) सप्तमी

(इ) 'आत्मना' इत्यत्र विभक्तिः अस्ति–

(i) द्वितीया

(ii) तृतीया

(iii) चतुर्थी

(iv) षष्ठी

6. निम्नलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् एकवाक्येन देयानि–

(i) वायुमण्डलं के दूषयन्ति ?

(ii) कीर्तिभवनस्य चत्वारः स्तम्भाः के ?

(iii) सोमशर्मा कस्य गृहे रात्रौ स्थितः ?

(iv) भरतः किमर्थं मूर्च्छितं भवति ?

7. महाकवि कालिदासस्य रचनाद्वयं लिखत–

8. अधोलिखितेषु एकस्य कवेः साक्षिप्त परिचयं लिखत।

(i) वेदव्यासः

(ii) भासः

(iii) भारविः

9. कति वेदाः सन्ति ? नामानि लिखत।

10. आदिकविः कः ? तेन कस्य ग्रन्थस्य रचनामकरोत् ?

11. निम्नलिखितेषु त्रयाणां अशुद्धकारकवाक्यानां शुद्धिः करणीया–

(i) सरस्वती नमः।

(ii) शिक्षकाय सह छात्राः भ्रमन्ति।

(iii) मोहनः काव्यलेखनस्य निपुणः अस्ति।

(iv) बालकात् मोदकं रोचते।

12. शुद्ध वाक्यानां समक्षे 'आम' अशुद्ध वाक्यानां च समक्षे 'न' इति लिखत–

(क) ''पूर्वेषु' पदे बहुवचनम् अस्ति।

(ख) 'आत्मने' पदे चतुर्थी विभक्ति नास्ति।

(ग) 'गाम्' पदे द्वितीया विभक्ति अस्ति।

13. युग्ममेलनम् कुरूत–

| | ''अ'' | ''ब'' |
|---|---|---|
| 1. | विरूपाक्षः | स्याम |
| 2. | यज्ञात् भवति | प्रशान्तम् |
| 3. | अदीनाः | शिवः |
| 4. | न वैरम उद्दीपयति | पर्जन्यः |

14. अधोलिखित चतुर्णां प्रश्नानां उत्तराणि एकपदेन लिखत–

(i) चम्पूरामायणस्य रचनां कः अकरोत् ?

(ii) प्रथमे वयसि कौ सेवनीयौ ?

(iii) अल्पारम्भः कथं भवति ?

(iv) द्रौपदी कस्य नृपस्य आत्मजा अस्ति ?

(v) सर्वविदां समाजे किं विभूषणम् ?

15. प्रदतैः शब्दैः अनुच्छेद लेखनं कुरूत–

(भाषाऽस्ति, एषा, व्याकरणादि दोषरहिता, भारतस्य, संस्कृतभाषा, कथनेन, भारतीयभाषाणां, महदादरो)

संस्कृतं न केवलं भारतवर्षस्य '''''''''''''' अपितु सा '''''''' गौरवं स्वाभिमानंच अस्ति। ........ वैज्ञानिकी सुव्यवस्थिता ......... अनुपमेया च भाषा अस्ति। संगणकयन्त्राय अपि ................. अत्युत्मा इति वैज्ञानिकानांमतम्। ''संस्कृतिः संस्कृताश्रितेति'' ............ संस्कृतस्य महत्वम् सिद्धम। ............ जननीय मित्यति वक्तुं शक्यते। सम्पूर्णे संसारे संस्कृतस्य कृते .............. विद्यते।

अथवा

(श्रुत्वा, सिद्धार्थस्य, शरीरात्, हंसं, निपातितः, उपवनं, हंसः, मम)

एकदा राजकुमारः सिद्धांर्थः विहारार्थम् .............. गतः। सहसा क्रन्दनध्वनिं ........ स इतस्ततः अपश्यत्। वाणेन बिद्धः एकः ........... भूमौ पतितः। एतत् दृष्टवा ...... चित्तं करूणया व्याकुलं जातम्। सः धावित्वा हंसस्य ...... बाणं निष्कास्य तम् अंके अधारयत्। अत्रान्तरे धावन् देवदत्तः तत्र प्राप्तः। सिद्धार्थस्य हस्ते ........ दृष्टवा सः उच्चैः अवदत सिद्धार्थ। एष हसः मया बाणेन .... अतः मयं देहि। एषः ......... अस्ति।

16. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्पुस्तकस्य सुभाषितद्वयं लिखत।

17. प्रदतैः शब्दैः रिक्तस्थान पूर्ति कुरूत–

(दुराचारः, शून्यमिव, संयतो, भावयन्तु)

(क) सुखार्थी ................ भवेत्।

(ख) सत्येन विना सदाचारः ........... एवं भवति।

(ग) ते दवाः ................ वः।

(घ) गृहं सर्व ..................... भासते स्म।

18. अधोलिखित गद्यांशौ पठित्वा प्रश्नानां उत्तराणि लिखित–

(अ) एकदा ब्रह्ममुहर्ते शयनादुत्थाय नदीस्नानार्थ प्रस्थितः सिंहद्वारसमीपे काञ्चित् सुन्दरीं सवेगं बहिर्गच्छन्तीदृष्ट्वा पृष्टवानेवम अयि। सुन्दरि का त्वं ? राजभवनात किमर्थं निर्गच्छसि ? सा प्राह– भो महाराज! अंक धनलक्ष्मी चिरात्रवैव भवनं मया निवासाय अंकीकृतम् अधना अहं भवनमिंद विहाय गन्तुमिच्छामि कृपया मेऽनुमतिं देहि।

(i) ब्रम्हमुहूर्ते राजा कुत्र प्रस्थितः ?

(ii) सिंहद्वार समीपे काम् अपश्यत् ?

(iii) बहिर्गच्छन्तीं दृष्ट्वा राजा किं पृष्टवान ?

(iv) गद्यांशात् एकम् अव्ययं चित्वा लिखत्।

(ब) तस्य वचनानि श्रुत्वा स्वर्णा खिन्ना जाता। चिकित्सालयेषु रूग्णानां संख्या वर्धमाना अस्ति। इत्यतः परिस्थितिः शोचनीतां गता अस्ति। आन्दोलनमग्नानां वैद्यानाम् अश्रद्धाकारणतः रूग्णाः नितरां पीडिताः सन्ति इति पत्रिकासु वार्ताः प्रसारिताः भोजनसमनन्तरमेव निद्रावशः जातः अजयः।

(i) का खिन्ना जाता ?

(ii) चिकित्सालयेषु केषां संख्या वर्धमाना अस्ति ?

(iii) के आन्दोलन मग्नाः आसन् ?

(iv) भोजनसमनन्तरमेव कः निद्रावशः जातः ?

(स) इयमाकाशवाणी। साम्प्रतं नवीनतमाः युद्धसमाचाराः श्रूयन्ताम्। देहलीनगर स्थिते रामलीलास्थले सुमहान्तं जनसम्मर्द सम्बोधयता प्रधानमन्त्रिणा श्री लालबहादुर शास्त्रिणा संघुष्टं यद् भारतीयसेना पाकसैन्यं धूलिधूसरीकर्तुं न संकोचलेशमेष्यति।

(i) इयं का ?

(ii) साम्प्रतं किं श्रूयन्ताम ?

(iii) कुत्र जनसम्मर्दम् आसीत् ?

(iv) तत्कालीनः प्रधानमंत्री कः ?

19. अधोलिखित पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि लिखत्।

(अ) निधानं धर्माणां किमति च विधानं नवमुदां,
प्रधानं तीर्थनाममलपरिधानं त्रिजगतः।
समाधानं बुद्धेरथ खलु तिरोधानमधियां,
श्रियामाधानं नः परिहरतु तापं तव वपुः।।

प्रश्नाः—

(i) गंगावपुः केषां निधानम् ?

(ii) तीर्थानां प्रधानं का ?

(iii) गंगावपुः कस्याः समाधानम् ?

(iv) ''वपुः' इत्यत्र का विभक्ति ?

(ब) न पण्डितः क्रुध्यति नाऽभिपद्यते, न चाऽपि संसीदति न प्रहृष्यति।
न चाऽर्थकृच्छ्र व्यसनेषु शोचते, स्थितः प्रकृत्या हिमवान् इवाऽचलः ।।

प्रश्नाः–

(i) पण्डिताः केषु न शोचते ?

(ii) कः न क्रुध्यति ?

(iii) पण्डितः कः इवाऽचल स्थितः ?

(iv) ''क्रुध्यति' पदे कः लकारः ?

(स) पश्येम शरदः शतं, जीवेम शरदः शतम्।

अदीनाः स्याम शरदःशतं, भूयश्च शरदः शतात्।।

प्रश्नाः–

(i) कति वर्षाणि पश्यामः ?

(ii) वयं कथं स्याम ?

(iii) श्लोके आगतम एकम् अव्ययं लिखत।

(iv) ''अदीनाः' इति शब्दस्य को अर्थः ?

20. स्वस्य स्थानान्तरण प्रमाणपत्रार्थं स्वस्य प्राचार्यस्य कृते एकं प्रार्थना पत्रम् लिखत।

अथवा

भ्रमणार्थं गमनाय स्वस्य मित्रस्य कृते एकं पत्रं लिखत–

21. अधोलिखित अपठित गद्यांशं पठित्वा प्रश्नानां उत्तराणि संस्कृतभाषायाम् लिखत।

(क) संसारे अनेकेषां दुःखानां मूलकारणम् अज्ञानम्। अज्ञानात् एव समाजे नानाविकारणां जन्म भवति हिंसा भ्रष्टाचारादयः। ये उपद्रवाः अस्मान् पीडयन्ति तेषां मूले अशिक्षा एव वर्तते। वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्तु सज्जाः भवेम।

प्रश्ना :–

(i) संसारे अनेके विकाराः कथं जायन्ते ?
(ii) दुःखानां मूलकारणं किम् ?
(iii) के उपद्रवाः अस्मान् पीडयन्ति ?
(iv) अपठितांशस्य उचितशीर्षकं लिखत्।

(v) 'पीडयन्ति' पदे का धातुः ?

22. अधोलिखितेषु एकस्मिन् विषयेशत शब्देषु संस्कृत भाषायां निबंधम् लिखत–

(i) भारतीय संस्कृतिः (ii) परोपकारः

(iii) संस्कृतभाषायाः गौरवम् (iv) सत्संङ्गतिः

—— – XX – –

## हायर सेकेण्डरी परीक्षा 2013–14
## आदर्श उत्तर
## संस्कृत सामान्य

**समय : 3 घण्टे** **पूर्णांक : 100**

1. (अ) (iii) नञतत्पुरूषः
   (ब) (iii) तत्पुरूषः
   (स) (i) जले मग्नः
   (द) (ii) द्विगुः समासः
   (इ) (iii) अयादि सन्धिः

2. (अ) (ii) प्रातः
   (ब) (iii) अस्
   (स) (iii) उप
   (द) (iii) पत्रम्
   (इ) (ii) महा+उत्सवः

3. (अ) (i) आदाय
   (ब) (ii) तिङ
   (स) (iii) ठक्
   (द) (ii) सुप्
   (इ) (iv) नमः+ते

4. (अ) (iii) लङ्लकारः
   (ब) (iii) बहुवचनम्
   (स) (ii) लृट्लकारः
   (द) (ii) ज्ञानं
   (इ) (ii) बलीयसी

5. (अ) (iii) शरीरम्
(ब) (iii) अनिलम्
(स) (ii) शान्तः
(द) (iv) सप्तमी
(इ) (ii) तृतीया

6. (i) वायुमण्डलं वाहनानि दूषयन्ति।
(ii) कीर्तिभवनस्य चत्वारः स्तम्भाः
धन–त्याग–सत्य–सदाचाराः भवन्ति।
(iii) सोमशर्मा रात्रौ कस्यचिद् ग्रामभट्टस्य गृहे स्थितः।
(iv) भरतः पितुः प्रतिमां दृष्ट्वा मूर्च्छितं भवति।

7. अभिज्ञान शाकुन्तलम
रघुवंशम्, मेघदूतम्, इत्यादयः।

8. कवेः संक्षिप्त परिचयं रचनादिकं च दृष्टवा अंकद्वयं प्रदेयाः।

9. चत्वारः वेदाः सन्ति।
ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः

10. आदिकविः बाल्मीकिः।
तेन रामायणग्रन्थस्य रचनामकरोत्।

11. (i) सरस्वत्यै नमः।
(ii) शिक्षकेन सह छात्राः भ्रमन्ति।
(iii) मोहनः काव्यलेखने निपुणः अस्ति।
(iv) बालकाय मोदकं सोचते।

12. (i) आम्

(ii) न

(iii) आम्

13.

| ''अ'' | ''ब'' |
|---|---|
| (i) विरूपाक्षः | शिवः |
| (ii) यज्ञात् भवति | पर्जन्यः |
| (iii) अदीनाः | स्याम |
| (iv) न वैरम् उद्दीपयति | प्रशान्तम् |

14.

(i) भोजराजः

(ii) नियमसंयमौ

(iii) क्षेमकरः

(iv) द्रुपदस्य

(v) मौनम्

15. भाषाऽस्ति
भारतस्य
व्याकरणादिदोष रहिता
संस्कृत भाषा
एषा
कथनेन
भारतीय भाषाणां
महदादरो

अथवा

उपवनं
श्रुत्वा
हंसः
सिद्धार्थस्य
शरीरात्
हंसं
निपातितः
मम

16. प्रत्येक शुद्ध सुभाषितस्य कृते अङ्कद्वयं निर्धारितम्।

17. (i) संयतो

(ii) दुराचारः

(iii) भावयन्तु

(iv) शून्यमिव

18. (अ)

(i) ब्रम्हमुहूर्ते राजा नदी स्नानार्थं प्रस्थितः।

(ii) सिंहद्वार समीपे काचित् सुन्दरीं सवेगं बहिर्गच्छन्तीम अपश्यत्।

(iii) राजा पृष्टवान् ''अयि सुन्दरि का त्वम् ? राज भवनात् किमर्थं गच्छसि ?

(iv) एकदा।

(ब) (i) स्वर्णा खिन्ना जाता।

(ii) चिकित्सालयेषु रूग्णानां संख्या वर्धमाना अस्ति।

(iii) वैद्याः आन्दोलनमग्नाः आसन्।

(iv) भोजनसमनन्तरमेव अजयः निद्रावशः जातः।

(स) (i) इयमाकाशवाणी।

(ii) साम्प्रतं नवीनतमाः युद्धसमाचाराः श्रूयन्ताम्।

(iii) देहलीनगरस्थिते रामलीलास्थले जनसम्मर्दं आसीत्।

(iv) तत्कालीन प्रधानमंत्री श्री लालबहादुरशास्त्री आसीत्।

19. (अ)

(i) गंगावपुः धर्माणां निधानम्।

(ii) तीर्थानां प्रधानं गङ्गा।

(iii) गङ्गावपुः बुद्धेः समाधानम्।

(iv) प्रथमा विभक्तिः।

(ब) (i) पण्डिताः अर्थकृच्छ्रव्यसनेषु न शोचते।

(ii) पण्डितः न क्रुध्यति।

(iii) पण्डितः हिमवान् इवाऽचलः स्थितः।

(iv) लट्लकारः।

(स) (i) शरदः शतं पश्यामः।

(ii) वयं अदीनाः स्याम।

(iii) भूयः।

(iv) दैन्यरहिताः।

20 पत्रे सङ्केतं सम्बोधनं दिनांक विषयं भाषादिकं च दृष्ट्वा शुद्ध पत्रस्य कृते चत्वारः अंकाः प्रदेयाः।

21. (i) संसारे अनेके विकाराः अज्ञानात् जायते।

(ii) दुःखानां मूलकारणं अज्ञानम् अस्ति।

(iii) हिंसाभ्रष्टाचारादयः उपद्रवाः अस्मान् पीडयन्ति।

(iv) अज्ञानम्

(v) पीड् धातु

22. सम्पूर्णशुद्धनिबंन्धस्य कृते दश अंकाः निर्धारिताःसन्ति।

– – X X – –